National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2023;** 1(50): 205-207
© 2023 NJHSR
www.sanskritarticle.com

**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः
.

**Correspondence:**
**डॉ. नन्दिघोषमहापात्रः**
सहायकाचार्यः, सर्वदर्शनविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीसदाशिवपरिसरः, पुरी, उत्कलाः

# भाट्टाभिमता प्रमाणमीमांसा

**डॉ. नन्दिघोषमहापात्रः**

**प्रबन्धसारः –**
तत्त्वज्ञानन्मोक्षः सिद्ध्यति इति सर्वतन्त्रसिद्धान्तः। तत्त्वानि तत्तद्दर्शनानुसारं भिन्नानि भिन्नानि भवन्ति। तानि च तत्त्वानि प्रमाणसाध्यानि भवन्ति। मानाधीना मेयसिद्धिर्मानसिद्धिश्चलक्षणात् इति अभियुक्त्यनुसारेण प्रमाणस्य तत्त्वसाधनत्वात् समग्रेऽस्मिन् वाङ्मये प्रमाणस्य वर्णनं आदावेव क्रियते। अत एव मानं मेयं प्रमाऽप्रमा चेत्यादीन् विषयानधिकृत्य विचारः सवैरेव दार्शनिकै उपस्थाप्यते। अथ किं तत्प्रमाणम्? किञ्चास्य स्वरूपम् ? कितिविधञ्च तत् ? इत्यादयः नैके जिज्ञासाः मनसि समुत्पद्यन्ते। तत्र प्रमायाः करणं प्रमाणम् । तत्तद्दार्शिनिकैः भिन्नरीत्या प्रमाणानां संख्या स्वीकृता। तत्र विशिष्य भाट्टाः प्रमाणानि प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयः षडेवेत्यामनन्ति।

**बीजपदानि -** प्रमा, करणम्, प्रमाणम्, प्रत्यक्षम्, अनुमानम्, उपमानम्, शब्दः, अर्थापत्तिः, अनुपलब्धिः ।

परिदृश्यमानमिदं जगत् दुःखक्लेशादिसंयुक्तं दुःखसागररूपं वर्तते । दुःखसागरादस्माद् तर्त्तुं मानवेन अन्विष्यते काचिन्नौका । जगति खलु सर्वेऽपि "सुखं मे स्यात् दुःखं माभूदिति चिन्तयन्ति । दुःखनिवारणं सुखोपलब्धिश्च मानवानां परमं लक्ष्यम्। तदपि सुखं परमपुरुषार्थरूपः मोक्षः एव भवति । तस्य एव निर्णयः तत्त्वज्ञानान्मुक्तिरिति आमनन्ति विद्वांसः दार्शनिकाः। **ऋते ज्ञानान्न मुक्तिः**[1] तरति **शोकमात्मविद्**[2] **ब्रह्म वेद ब्रह्मैव भवति**[3] । **ब्रह्मैव सन् ब्रह्माप्येति**[4] इत्यादीनि वचनानि तत्र प्रमाणभूतानि वर्तन्ते । दर्शनेषु ज्ञानमेव मोक्षनिमित्तं सर्वोत्कृष्टं साधनमिति उद्घोष्यते । तत्त्वानां च ज्ञानेन मोक्षः लभ्यते । तत्त्वानि प्रमाणसाध्यानि भवन्ति । मानाधीना मेयसिद्धिर्मानसिद्धिश्चलक्षणात् इति अभियुक्त्यनुसारेण प्रमाणस्य तत्त्वसाधनत्वात् समग्रेऽस्मिन् वाङ्मये प्रमाणस्य वर्णनं आदावेव क्रियते । अत एव मानं मेयं प्रमाऽप्रमा चेत्यादीन् विषयानधिकृत्य विचारः सवैरेव दार्शनिकै उपस्थाप्यते । प्रमायाः करणं प्रमाणम् । प्रमा नाम सारभूतसम्पन्न- अज्ञाततत्त्वस्य ज्ञानं प्रमा । अत्र अज्ञातपदेन स्मृति-अनुवादज्ञानयो निरासः तयोः पूर्वज्ञातत्त्वात् । तदुक्तम् मानमेयोदये -

**प्रमाकरणमेवात्र प्रमाणं तर्कपक्षवत्।**
**प्रमा चाज्ञाततत्त्वार्थज्ञानमेवात्र भिद्यते।।**[5]
**तस्मादज्ञाततत्त्वार्थज्ञानस्मासाधनमेव नः।**
**प्रमाणमिति निर्णीतं तद्विशेषानथ ब्रुवे ।।**[6]
**किञ्च यत्र यदस्ति, तत्र तस्यानुभवः प्रमा।**
**तद्वति तत्प्रकारकानुभवो प्रमा।**[7]

पदार्थस्य वास्तविकं ज्ञानमेव प्रमा । अत्र भ्रमसंशययोः निरासः । तस्याः प्रमायाः प्रकृष्टं साधनं प्रमाणमित्यभिधीयते । येन अज्ञातवस्तुनः ज्ञानं भवति, यस्य ज्ञानान्तरेण बाधो न जायते, यच्च दोषरहितं भवति तत् प्रमाणमिति कथ्यते । तद्यथोक्तं पार्थसारथिमिश्रेण -

**कारणदोषबाधज्ञानरहितमगृहीतग्राहिज्ञानं प्रमाणम् ।**[8]

तच्च प्रमाणं तत्तद्दार्शनिकानुसारं तत्तत्प्रकारकं भवति । तद्यथा -

**चार्वाकास्तावदेकं द्वितीयमपि पुनः बौद्धवैशेषिकौ द्वौ**

**भासर्वज्ञश्च सांख्यस्त्रितयमुदयनाद्याश्चतुष्कं वदन्ति।**
**प्राहुः प्रभाकराः पञ्चकमपि च वयं तेऽपि वेदान्तविज्ञाः**
**षट्कं पौराणिकस्त्वष्टकमभिदधिरे सम्भवैतिह्ययोगात्** ।[9] इति।

प्राभाकरास्तु प्रत्यक्षानुमानोपमानशब्दार्थापत्तिरिति पञ्चप्रमाणान्यङ्गीकुर्वन्ति। अनुपलब्ध्या सह भाट्टाः प्रमाणानि षडेवेत्यामनन्ति। तदुक्तम् -

**प्रत्यक्षमनुमानं च शब्दं चोपमितिस्तथा ।**
**अर्थापत्तिरभावश्च षड् प्रमाणानि मादृशाम्** ।।[10]

**प्रत्यक्षप्रमाणम् -**

कारणदोषरहिताबाधितेन्द्रियसन्निकर्षजं प्रमाणं प्रत्यक्षप्रमाणम्। नैयायिकानामिव इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम्।[11] मीमांसका अपि प्रत्यक्षलक्षणमाचरन्ति। **यत्सम्प्रयुक्तेऽर्थे विशादाणवभासं ज्ञानं जनयति तदिन्द्रियम्।**[12] इन्द्रियाणि षडेवेति चक्षुरसनघ्रणस्पर्शश्रोत्राणि मनश्चेति ।

सन्निकर्षः द्विविधः संयोगः संयुक्ततादात्म्यमिति। तत्र पृथिव्यादीनां चतुरादीन्द्रियैः संयोगेन, दिगांकाशान्धकाराणां चक्षुसंयोगेन, आत्मनः मनसंयोगेन, कालस्य सवैरप्यन्द्रियैः संयोगात् ज्ञानं जायते। यदा चक्षुरादिसंयुक्तपृथिव्यादिषु तादात्म्येनावस्थितानां जातिगुणकर्मणां ग्रहणं भवति तदा संयुक्ततादात्म्यं सन्निकर्षः। तदुक्तम् -

**रूपादीनां तु संयुक्तद्रव्यतादात्म्यमेवनः।**
**प्रतीतिकारणं तस्मान्न संम्बन्धान्तरस्पृहा।।**[13] इति।

गुणकर्मादिगतजातिं बोधयितुं अन्यसन्निकर्षस्य ग्रहणमनावश्यकं द्रव्येण सह तेषां परम्परया तादात्म्यात्। यथा नैयायिकाः रूपे रूपत्वग्रहणाय संयुक्तसमावेतसमवायसन्निकर्षं स्वीकुर्वन्ति । तथैव भाट्टमीमांसकैरपि रूपत्वग्रहणाय संयुक्ततादात्म्यतादात्म्य नाम तृतीयसन्निकर्षग्रहणे न काऽपि हानिः। अतः सन्निकर्षः द्विविधः त्रिविधो वा अङ्गीकर्तुं शक्यम्। तच्च प्रत्यक्षं द्विविधं निर्विकल्पकसविकल्पकभेदेन। इन्द्रियसन्निकर्षानन्तरं द्रव्यादिस्वरूपमात्रावगाहिशब्दसम्बन्धरहितं यत् साधारणमेव ज्ञानमुत्पद्यते विशिष्टकल्पनारहितत्त्वात् रज्ज्ञानं निर्विकल्पकमित्युच्यते। यथा- अस्ति किञ्चिदिदमिति ज्ञानम्। तद्यथोक्तं वार्तिककारेण -

**अस्ति ह्यालोचनं ज्ञानं प्रथमं निर्विकल्पकम् ।**
**बालमुकादिविज्ञानसदृशं शुद्धवस्तुजम्** ।।[14]
**न विशेषो न सामान्यं तदानीमनुभूयते ।**
**तयोराधारभूता तु व्यक्तिरेवावसीयते** ।।[15]
**अभिलापसंसर्गयोग्यप्रतिभासा प्रतीतिः कल्पना, तथा रहितम्** ।[16]

अर्थात् दूरे वस्तु दृष्ट्वा सर्वप्रथमं "अस्ति किञ्चिदेतत्" इति ज्ञानं जायते। क्रमशः यदा वस्तु समीपमायाति तदानीं नामजातिगुणक्रियाद्रव्यकल्पनाः क्रियन्ते। तद्रहितं ज्ञानमेव निर्विकल्पकमित्युच्यते। तत्सहितं ज्ञानं सविकल्पकमित्युच्यते। नि|वकल्पकज्ञानानन्तरं संज्ञादिस्मारणपूर्वकं जात्यादिविशिष्टावगाहिज्ञानं सविकल्पकमित्युच्यते। यथा- काचित् गौ दृष्ट्वा कपिला नामअ स्याः, इयं गौः, पीतवर्णेयम्, आगच्छतीयं, सास्नादिमतीयम् इत्यादिप्रकारकं ज्ञानं सविकल्पकम् ।

इन्द्रियभिन्नद्रिव्यं, तद्वता जातिः, र्ततो गुणः, तद्वतं कर्म च प्रत्यक्षप्रमाणस्य विषयाः भवन्ति । तदुक्तम् -

**इन्द्रियव्यतिरिक्तानि द्रव्याण्येषां च जातयः।**
**प्रायश्च गुणकर्माणि प्रत्यक्षाणीति वक्ष्यते।।**[17]

**अनुमानम् -**

अनुमीयते ज्ञायते वा पदार्थः येन तदनुमानम्। अनु शब्देन अत्र प्रत्यक्षानु इति भावः। प्रत्यक्षप्रमाणेन असिद्धं तत्त्वं प्रमाणयितुम् अनुमान प्रवर्तते । व्याप्यादर्शनादसन्निकृष्टार्थज्ञानमनुमानम्। यथा- पर्वते धूमदर्शनेन अग्निज्ञानम्। अत्र धूमः व्याप्यः अग्निः व्यापकः। यद्यतो वहिर्न वर्तते तत्तस्य व्याप्यम् । धुमः दहनात् बह्निः न वर्तते अतः धूमः व्याप्यः। अग्निश्च धूमात् अन्यत्रापि अङ्गारादौ अयोगोलके वा वर्तते इति कृत्वा अग्निः व्यापकः । व्याप्तिश्च स्वाभाविकसम्बन्धः। स्वाभाविकसम्बन्धो नाम उपाधिरहितसम्बन्धः । व्याप्तिश्च द्विविधा। समव्याप्तिः विषमव्याप्तिश्चेति । या व्याप्तिः उभयोः पदार्थयोः भवति सा समव्याप्ति । यथा कृतकत्वानित्यत्वयोः यत्र यत्र कृतकत्वं तत्र तत्रानित्यत्वम् इति । यत्र यत्रानित्यत्वं तत्र तत्र कृतकत्वमिति । या तु एकस्मिन् एव पदार्थे तिष्ठति इतरेस्मिन् न तिष्ठति सा विषयव्याप्तिः । यथा- धूमबह्न्योः यत्र यत्र धूमः तत्र तत्र वह्निः न तु यत्र यत्र वह्निः तत्र तत्र धूमः। वार्तिककारः एतदेव प्रदर्शयति -

**यो यस्य देशकालाभ्यां समं न्यूनतोऽपि वा भवेत् ।**
**स व्याप्यो व्याकस्तस्य समो वाप्याधिकोऽपि वा** ।।[18]

अनुमाने व्याप्तिलक्षणसम्बन्धः लिङ्गं भवति। सा च व्याप्तिः भूयोदर्शनेन गृह्यते । तदुक्तम् -

**सम्बन्धो व्याप्तिरिष्टात्र लिङ्गधर्मस्य लिङ्गिना।**
**भूयो दर्शनगम्या च व्याप्तिः सामान्यधर्मयोः।**
**ज्ञायते भेदहानेन क्वचिच्चापि विशेषयोः।।**[19]

मीमांसकैः अन्वयव्याप्तिर्व्यतिरेकव्याप्तिश्चेति द्विधा व्याप्तिः स्वीक्रियते। यत्सत्त्वे यत्सत्त्वमन्वयः। यदभावे यदभावं व्यतिरेकः। तदाधारेण अनुमानमपि केवलान्वयी केवलव्यतिरेकी अन्वयव्यतिरेकीभेदेन त्रिविधो भवति। यस्मिन् अनुमाने उभयविधव्याप्तिरस्ति तदन्वयव्यतिरेकी अनुमानम्। यथा- धूमात् वह्नेरनुमानम्। यथा महानसे धूमसत्त्वे वह्निसत्वम् अन्वयव्याप्ति। महाह्रदे वह्नि-अभावे धूमाभावः व्यतिरेकव्याप्तिः।

यस्मिन् अनुमाने केवलमन्वयव्याप्तिरस्ति व्यतिरेकव्याप्तिर्नास्ति तत् केवलान्वयी-अनुमानम्। यथा ज्ञानं ज्ञानान्तरप्रकाश्यम्, वस्तुत्वात्, घटवत्। यत्र यत्र वस्तु तत्र तत्र ज्ञानमनश्यं विद्यते। परन्तु यत्र ज्ञानं नास्ति तत्र वस्तु अपि नास्ति इति वक्तुं न शक्यते। अतः व्यतिरेकव्याप्त्यभावात् केवलान्वयी अनुमानम्। यस्मिन् अनुमाने केवलं व्यतिरेकव्याप्तिरस्ति अन्वयव्याप्तिर्नास्ति तत् केवलव्यतिरेकी-अनुमानम् । यथा- सर्वं ज्ञानं स्वप्रकाशं, ज्ञानत्वात्। यत्र स्वप्रकाशत्वं नास्ति तत्र ज्ञानमपि नास्ति। नतु यत्र ज्ञानत्वमस्ति तत्र स्वप्रकाशकत्वमस्ति इति वक्तुं शक्यते । अत्र अन्वयव्याप्तिरसम्भवात् केवलव्यतिरेकसम्भवात् केवलव्यतिरेकी-अनुमानम्। भाट्टाः केवल-

व्यतिरेकी-अनुमानं न स्वीकुर्वन्ति। तत्स्थाने अर्थापत्तिप्रमाणं स्वीकुर्वन्ति । तदुक्तं -

**तं च कौमारिलाः प्रयो नेच्छन्ति व्यतिरेकिणम् ।**
**तत्स्थाने चाभिषिश्चन्ति पश्चमीं प्रमितिं पुनः ।।**[20]

**शब्दप्रमाणम् -**

पदैः पदार्थस्मरणं स्मारितपदार्थैः यद्वाक्यार्थज्ञानं तत् शब्दप्रमाणम्। तदुक्तं मानमेयोदये -

**तत्र तावत्पदैर्ज्ञातैः पदार्थस्मरणे कृते ।**
**असन्निकृष्टवाक्यार्थज्ञानं शाब्दमितीर्यते ।।**[21]

किञ्च पण्डितचिदानन्दमतेन -

**विज्ञातेभ्यः पदेभ्यः पदार्थस्मृतिमुखेनासन्निकृष्टेऽर्थे यत् ज्ञानं, तच्छाब्दम् ।**[22]

शाब्दज्ञानं सर्वदा व्युत्पत्यधीनं भवति। व्युत्पत्तिश्च गामानय पुत्रस्ते जातः इत्यादिवाक्यप्रमोगानन्तरं जायमाना प्रवृत्तिः उत्पद्यमानः हर्षो वा संजायते ।

शाब्दबोधेत्रीणि कारणानि भवन्ति आकाङ्क्षायोग्यतासन्निधिश्चेति । तदुक्तम् -

**अत्राकाङ्क्षा च योग्यत्वं सन्निधिश्चेति तत्त्रयम्।**
**वाक्यार्थावगमे सर्वैः कारणत्वेन कल्प्यते ।।**[23]

गौ, अश्वः, पुरुषः, हस्ती इत्यादिआकांक्षाविरहितैः पदैः शाब्दबोधो न जायते। अग्निना सिञ्चतीति अयोग्यपदोच्चारणेन अन्वयबोधो न भवति। गाम् आनय इति द्वयोः पदयोः विलम्बोच्चारणेन अपि शाब्दबोधो न जायते । तदुक्तं मानमेयोदये-

**गौरश्वः पुरुषो हस्तीत्याकाङ्क्षारहितेष्विह ।**
**अन्वयदर्शनात् तावदाकाङ्क्षा परिगृह्यते ।।**[24]
**अग्निना सिञ्चतीत्यादावयोग्यानामनन्वयात् ।**
**योग्यताऽपि परिग्राह्या सन्निधिस्त्वथ कथ्यते ।।**[25]

तत् च शब्दप्रमाणं द्विविधं लौकिकं वैदिकञ्चेति। लौकिकं पौरुषेयं वैदिकन्त्वपौरुषेयम् -

**उपमानप्रमाणम् -**

शादृश्यज्ञानमुपमितिः तत्करणमुपमानम्। दृश्यमानपदार्थेषु सादृश्य-स्मर्यमाणं असन्निकृष्टसादृश्यज्ञानमुपमानम्। तदुक्तं मानमेयोदये -

**दृश्यभावार्थसादृश्यात् स्मर्यमाणार्थगोचरम्।**
**असन्निकृष्टसादृश्यज्ञानं ह्युपमितिर्मता ।।**[26]

वनंगतः पुरुषः गौ सदृशं पिण्डविशेषं दृष्ट्वा गुरुवाक्यश्रवणात् अयं गवयः इति निश्चीनोति। तदेव ज्ञानमुपमितिः। तत्करणञ्चो-पमानमिति । तदुक्तं मानमेयोदये-

**नगरे खलु पूर्वं गां पश्यतोऽपि न भासते ।**
**तत्स्थं गवयसादृश्यं गवयस्यानिरीक्षणात्।।**[27]

**अर्थापत्तिः -**

पीनत्वाद्युपपाद्यपदार्थस्य अन्यथानुपपत्त्याधारेण रात्रिभोजन-रूपोपपादक-कल्पनमर्थापत्तिः। तदुक्तम् -

**अन्यथानुपपत्त्या यदुपपादककल्पनम् ।**
**तदर्थापत्तिरित्येवं लक्षणं भाष्यभाषितम् ।।**[28]

**अनुपलब्धिः -**

अभावरूपार्थस्य बोधकमनुपलब्धि प्रमाणम्। अनुपलम्भयोग्यत्वे सत्युनुपलम्भनम् इति अनुपलब्धिप्रमाणलक्षणम्। तदुक्तम् -

**अर्थोपलम्भयोग्यत्वे सत्यप्यनुपलम्भनम् ।**
**अभावाख्यं प्रमाणं स्यादभावस्यावबोधकम् ।।**[29]

एवं भट्टाभिमतानि षड्प्रमाणानि स्थालीपुलाकन्यायेन दिङ्मात्रमिहोपस्थापितानि।


| | | | | |
|---|---|---|---|---|
| 1. | ईशादि नौ उपनिषद् (शाङ्करभाष्यार्थ) | | गीताप्रेस, गोरखपुर | २०१० |
| 2. | ईशाद्यष्टोत्तरशतोपनिषदः | वासुदेवलक्ष्मणपणशीकरः | चौखम्बा विद्याभवन, वाराणसी | २००२ |
| 3. | उपनिषत्संग्रहः | श्रीनगेन्द्रप्रसादजैन | मोतिलाल बनारसी दास, दिल्ली | १९७० |
| 4. | न्यायसूत्रम् | महर्षिगौतमः | चौखम्बा संस्कृत संस्थान, वाराणसी | २००९ |
| 5. | भारतीयदर्शन | डॉ. उमेशमिश्रः | उत्तरप्रदेश हिन्दी संस्थान, लखनऊ | २००३ |
| 6. | भारतीयदर्शन | बलदेव उपाध्याय | शारदा मन्दिर,वाराणसी | २००९ |
| 7. | भारतीयदर्शन की चिन्तनधारा | प्रो. राममूर्त्तिशर्मा | चौखम्बा विद्याभवन, वाराणसी | २००३ |
| 8. | महाभारतम् | भगवान् व्यासः | गीताप्रेस, गोरखपुर | २००३ |
| 9. | महोपनिषद् | | गीताप्रेस गोरखपुर | २००३ |
| 10. | मानमेयोदयः | नारायणभट्टः | चौखम्बा विद्याभवन, वाराणसी | २००९ |
| 11. | मीमांसादर्शनविमर्शः | डॉ. वाचस्पतिउपाध्यायः | भारतीय विद्या प्रकाशन, वाराणसी | १९७६ |
| 12. | श्लोकवार्तिकम् | कुमारिल भट्ट | श्री सद्गुरु पब्लिकेशन्स, दिल्ली, | १९८३ |


**पादटिप्पणी -**

[1] श्वे.उ. - ३-८
[2] छा. - ७-१
[3] मु.उ. - ३-२-९
[4] बृ. - ४-४-२२
[5] मा.मे. - ३
[6] मा.मे. - ४
[7] त.चि.पृ. - ४३४-४३६
[8] शा.दी. - १-१-५
[9] मा.मे. - ६
[10] मा.मे. - ५
[11] गौ.सू. - १-१४
[12] शा.दी. - पृ.-३६
[13] मा.मे. - पृ.सं. १६
[14] श्लो.वा - ४-११२
[15] श्लो. वा. पृ. - १६९
[16] न्या.वि.पृ. - ४७
[17] मा.मे. - ९
[18] श्लो.वा.अ.प.पृ. - ३४९
[19] श्लो. वा. अ. प. पृ. - ३४९ - ३५०
[20] मा.मे. - ३६
[21] मा.मे. - ८९
[22] नीति. पृ. - १४४
[23] मा.मे. - ९२
[24] मा.मे. - ९३
[25] मा.मे. - ९४
[26] मा.मे. - १०८
[27] मा.मे. - १०९
[28] मा.मे. - १२७
[29] मा.मे. - १५४